॥ श्रीरामचारित्रमञ्जरी ॥

श्रीमान्पूर्वं प्रजातो दशरथनृपते रामनामाऽथ नीतो
विश्वामित्रेण मन्त्राद्दनुजसहितस्ताटकां घातकोऽस्त्रम् ।
ब्रह्माद्यं प्राप्य हन्त्वा निशिचरनिकरं यज्ञपालो विमोच्या-
हल्यां शापाच्च भञ्क्त्वा शिवधनुरुपयन् जानकीं नः प्रसीदेत् ॥ १॥

आयन् रामः सभार्योऽध्वनि निजसहजैर्भार्गवेष्वासरोपात्
तद्गं हत्वा सुरारिं पुरग उत नुतस्तापसैर्भूपपृष्टैः ।
कल्याणानन्तधर्मोऽगुणलवरहितः प्राणिनामन्तरात्मेत्-
याद्युक्तश्चाभिषेके पुरजनमहितो मह्यतां मे वचोभिः ॥ २॥

कैकेयीप्रीतिहेतोः ससहजनृपजो वल्कली यानरण्यं
गङ्गातारी गुहार्च्यः कृतरुचिरजटो गीष्पतेः पुत्रमान्यः ।
तीर्त्वा कृष्णां प्रयातोऽवतु निजममलं चित्रकूटं प्रपन्नं
स्वाम्बाभिभ्रातरं तं श्रुतजनकगतिः सान्त्वयन् व्युप्ततीर्थः ॥ ३॥

दत्त्वाऽस्मै पादुके स्वे क्षितिभरणकृतौ प्रेप्य तं काकनेत्रं
व्यस्याराद्योऽत्रिनाम्ना वनमथ समितो दण्डकं तापसेष्टम् ।
कुर्वन् हत्वा विराधं खलकुलदमनं याचितस्तापसाग्रै-
स्तेषां दत्वाऽभयं स्वानसिधनुरिषुधीन् यानगस्त्यात्स पायात् ॥ ४॥

आसीनः पञ्चवट्यामकुरुत विकृतां राक्षसीं यो द्विसप्त-
क्रव्यादानामप्यनेकानथ खरमवधीद् दूषणं च त्रिशीर्षम् ।
मारीचं मार्गरूपं दशवदनहृतामाकृतिं भूमिजाया
अन्विष्यन्नार्तगृध्रं स्वगतिमथ नयन् मामवेत् घ्नन् कबन्धम् ॥ ५॥

पम्पातीरं स गच्छन्निह कृतवसतिः भक्तितुष्टः शबर्यै
दत्त्वा मुक्तिं प्रकुर्वन् हनुमत उदितं प्राप्तसुग्रीवसख्यम् ।
सप्त च्छित्वाऽथ तालान् विधिवरबलिनो वालिभित् सूर्यसूनुं
कुर्वाणो राज्यपालं समवतु निवसन् माल्यवत्कन्दरेऽसौ ॥ ६॥

नीत्वा मासान् कपीशानिह दश हरितः प्रेष्य सीतां विचिन्त्याऽऽ-
यातश्रीमद्धनूमद्गिरिमथ समनुशृत्य गच्छन् कपीन्द्रैः ।
सुग्रीवाद्यैरसङ्ख्यैर्दशमुखसहजं मानयन्नब्धिवाचा
दैत्यघ्नः सेतुकारी रिपुपुररुदवेद् वानरैर्वैरिघाती ॥ ७॥

भग्नं कृत्वा दशास्यं गुरुतरवपुषं कुम्भकर्णं निहत्य
प्रध्वस्ताशेषनागं पदकमलनतं ताक्ष्यमानन्द्य रामः ।
सर्वानुज्जीवयन्तं गिरिधरमनघश्चाञ्जनेयात् कपीन् स्वान्
विज्ञानास्त्रेण रक्षन् समवतु दमयन् लक्ष्मणाच्छक्रशत्रम् ॥ ८॥

क्रव्यादान् घ्नन्नसङ्ख्यानपि दशवदनं ब्रह्मपूर्वैः सुरेशैः
पुष्पैराकीर्यमाणो हुतवहविमलामाप्य सीतां विधाय ।
रक्षोनाथं स्वभक्तं स्वपुरमथ गतः पुष्पकस्थैः समस्तैः
साम्राज्ये चाभिषिक्तो निजजनमखिलं मानयन् मे गतिः स्यात् ॥ ९॥

रक्षन् क्षोणीं ममृद्धां नुत उत मुनिभिर्मानयन् वायुसूनुं
प्रेष्यादित्यात्मजादीन् व्यतनुत भरतं यौवराज्येऽनुमान्य ।
कार्ये सौमित्रिमार्तश्वगदितकृदरिघ्नोऽथ शत्रुघ्नतो यो
हत्वाऽसौ दुष्टशूद्रं द्विजसुतगुबवेत् कुम्भजान्मालभारी ॥ १०॥

यज्ञं तन्वन् त्रिकोटीन् व्यतुदत भरताद्योऽसुरानीशवाक्याद्[1]
यास्यन् धामात्रिपुत्रं भुजिमथ स नयन्नात्मसूनू स्वराज्ये ।
कृत्वा श्रीह्रीहनूमद्धृतविमलचलच्चामरच्छत्रशोभी
ब्रह्माद्यैः स्तूयमानो निजपुरविलसत्पादपद्मोऽवतान्माम् ॥ ११॥

इति श्रीरामचारित्रमञ्जरी लेशतः कृता ।
राघवेन्द्रेण यतिना भूयाद् रामप्रसाददा ॥ १२॥

इति श्रीराघवेन्द्रतीर्थश्रीचरणकृता श्रीरामचारित्रमञ्जरी ।

॥ भारतीरमणमुख्यप्राणान्तर्गत श्री कृष्णार्पणमस्तु॥

[1] व्यतनुत भरताद्यः सुरानीशवाक्याद्